Certificate

SMT. HANSA MEHTA

# ।। निर्देशकप्रमाणपत्रम् ।।

श्रीमानायुष्मान् योगेशकुमारः त्रिवेदी "पाणिनिहेमबोधितशब्दानुशासने कारकतत्त्वानुशीलनमि"ति विषयमाश्रित्य मन्निर्देशने साधु समीक्ष्य शोधकार्यं सम्पूर्णं विधाय स्वकीयां वाचस्पति (Ph.d.)-रित्युपाधिप्राप्तिर्योग्यतां प्रमाणितवान्। यावदहं जानामि, शोधनिबन्धेऽमुष्मिन् विदुषाऽनुसन्धात्रा नूत्नादृष्टिः नूतनतथ्याऽविष्कारः साङ्गोपाङ्गविषयस्पर्शिनो विचारा भूयोऽनुसन्धाय पर्याप्तं परिश्रम्य च समुपस्थापिताः।

अतो विश्वविद्यालयीयविध्यनुसारं वाचस्पतिरित्युपाध्यवाप्तये शोधनिबन्धममुं परीक्षणार्थं प्रस्तौमि।

निर्देशकः

30/04/2010

डॉ.श्री रामपाल शुक्लः

व.प्राध्यापकः

वटोदरसंस्कृतमहाविद्यालयः

म.स.विश्वविद्यालयः, वटोदरम्

F.W.C.S.
for further consideration.
YogeshB

Smt. Hansa Mehta Library, The M. S. University of Baroda

## ॥ द्वे वचसी ॥

अखिलब्रह्माण्डस्याधिनायकविरञ्चिनेयं सृष्टिर्व्यरचि। मनुष्याणां व्यवहाराय क्रमेण गीर्विकसिता। सृष्टेरारम्भतोऽद्यावधौ विश्वस्य नैकासां भाषाणां निर्माणमभवत्। किन्त्वासु गिरासु सर्वतः प्राचीनत्वेन संस्कृतभाषैव वर्तते। यद्यपि पाश्चात्यपण्डिता ग्रीकलेटिनादिभाषाणां स्वसंस्कृतिमाधृत्य प्राचीनतमभाषां संस्थापयितुं यथाकथञ्चित्प्रयासमावहन्ते। किन्तु जगतोऽद्ययावत्प्राचीनतमग्रन्थ-ऋग्वेदस्यानयैव भाषया निबद्धत्वात्तथा च गवेषिततत्त्वान्याधृत्य संस्कृतमेव प्राचीनत्वेनोपस्थाप्यते। यद्यपि विश्वस्य बहूनां देशानां सांस्कृतिकपरम्पराणां कलाकौशलानां चाधारभूतं भारतम् वा तत्कालीनभाषा संस्कृतमेवास्ति। अतः संस्कृतसहाय्येन तेषां ज्ञानं सरलतरं भवति। साम्प्रतं भाषाविज्ञानसदृशापूर्वशास्त्रस्याऽपि प्रमुखाधारस्तम्भः संस्कृतभाषा-ध्ययनमेवास्ति। संस्कृतगिरि न केवलं भारतस्य अपि तु सकलसंसारस्य मानवजातेश्च सहस्त्रवर्षपूर्वस्येतिहासोऽधुना अस्यां जीर्णावस्थायामपि सुरक्षितोऽस्ति।

संस्कृतभाषा यद्यपि सहस्त्रवर्षपर्यन्तं लोकव्यवहारस्य भाषाऽऽसीत्। एवञ्च तस्यां य उपयोगी गुणो वर्तते सोऽन्यस्यां कस्यामपि भाषायां नास्ति। तथापि विधिवशात् लोकव्यवहारेण विलुप्ता जाता, अधुना सा मृतभाषा (Dead Language) पदेनोच्यते। अतः अमुष्मिन् समये विना व्याकरणं तस्य परिज्ञानं न सम्भवति। अनेन सह तदपि ध्यातव्यं यत् संसारे केवलसंस्कृतमेव एतादृशी भाषा वर्तते यस्या व्याकरणं सर्वाङ्गीणं पूर्णपरिष्कृतञ्चोच्यते। संस्कृतभाषाया अमुषु व्याकृतिषु महर्षिपाणिनिप्रणीतं पाणिनीयव्याकरणमेव अद्यावधिप्रणीतव्याकरणेषु सर्वश्रेष्ठमत्यन्तपरिष्कृतं वेदाङ्गगण्यम् प्राचीनं लब्धप्रतिष्ठितञ्च वर्तते।

महामुनिपाणिनेः कालोऽद्यावधिपर्यन्तं निश्चितरूपेण निर्धारितो नास्ति। बहूनां सुधीनाम्मते तस्याविर्भावो भगवतो बुद्धात् (५४३ इ. पूर्व) बहुपूर्वमभवत्। यतो हि भगवतो बुद्धस्य समये यत्र पालिप्राकृतञ्च जनसाधारणस्य भाषा आसीत्। तत्र

पाणिनिकाले उदात्तादिस्वरयुक्तसंस्कृतभाषायाः जनभाषारुपेण व्यवहारोऽष्टाध्यायि-ग्रन्थस्य अनेकप्रमाणैः सुतरां सिद्धो वर्तते।

पाणिनेरितिवृत्तं तस्य कालापेक्षयाऽपि इन्द्रियज्ञानाविषयं वर्तते। भाष्यकार-पतञ्जलिदिशा तस्य मातुर्नाम दाक्षी वर्तते। 'सर्वेसर्वपदादेशा दाक्षीपुत्रस्यपाणिनेः' (महाभाष्य १.१.२०)। न्यासकारो जैनेन्द्रबुद्धिः, काव्यालङ्कार-कार भामहः, गुणरत्न-महोदधिकारः पाणिनेः पूर्वजस्य निवासस्थानं शालानामकं ग्रामं स्वीकुर्वते। वर्तमानकाले लहुर (= लाहोर) नाम्ना (यः शलातुरस्यापभ्रंशोऽस्ति।) प्रसिद्धो वर्तते। कथासरित्सा-गरस्य अनुसारेण पाणिनेर्गुरोर्नाम वर्ष आसीत्। गुरुपत्नीप्रेरणयाऽयं हिमालयमेत्य तपस्याद्वारा विद्यामधिजगाम। महाभाष्यकाशिकानुसारेण पाणिनिः स्वशिष्यान् असकृद्वारं स्वग्रन्थमध्यापयामास। भाष्ये तस्य कौत्सनामकशिष्यस्य केवलमुल्लेखो मिलति। [1]महामुनिपाणिनेर्निधनमेकसुभाषितानुसारेण त्रयोदश्यां सिंहद्वाराऽभूत्। [2]महर्षि-पाणिनिसदृशोवैयाकरणो भुवि अद्यावधि न जातः।

पाणिनिव्याकृतेः सम्भवतस्तस्या विशेषतायाः कारणेन अतिशीघ्रं प्रचारः प्रसारो वा जातः। जनैः पाणिनीयात्प्राग् पूर्वप्रचलितानि व्याकरणानि तुच्छत्वेन हेयत्वेन च परिगणितानि। कतिपयशताब्द्यनन्तरमनुपाणिनि कात्यायनः स्ववार्तिकसूत्रद्वारा पाणिनेः सूत्रार्थान् गुप्ताशयान् वा सम्यक्तया प्रकटितवान्। कात्यायनं वार्तिककारो वाक्यकारो वाप्युच्यते। कात्यायनस्य कतिपयशताब्द्यनन्तरं महामुनिपतञ्जलिना पाणिनीयव्याकृतेः परिष्करणस्य अपूर्वकार्यं कृत्वाऽस्य व्याकरणस्य कीर्तिपताका चतुर्षु दिक्षु प्रसारिता। पाणिनिव्याकरणे पतञ्जलिना लिखितो महाभाष्यनामकग्रन्थोऽत्यन्तः प्रामाणिकः स्वप्रवाहशैल्याश्च अपूर्वभाष्यं वर्तते। महर्षिपतञ्जलेः समयः पाश्चात्यविदुषां दृष्टौ इसा पूर्व १५० प्रायः बहुसम्मतं वर्तते।

पाणिनिकात्यायनपतञ्जलयः पाणिनीयव्याकरणस्य प्रमुखाचार्या मुनित्रयत्वेन वा भण्यन्ते।

१. सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः – (पञ्चतन्त्र २.३६)
२. पाणिनीव्याकरण मानवीय मस्तिष्क की सबसे बडी रचनाओं में से एक है – (लेनिनग्राड के प्रो.टी. शेरवात्सकी)

अत्र उत्तरोत्तरमुनिना पूर्वपूर्वमुनेः गूढरहस्यानि प्रकाशितानि अतः 'उत्तरोत्तरं मुनीनां प्रामाण्यम्' इति स्थिरीकृतम्।

पाणिनीयपरम्परया संस्कृतभाषायाः परिष्कृतरुपं स्थिरमभूत्। किन्तु व्याकृतिशास्त्रस्यान्यान्यपद्धत्यः सुचारुरुपेण अचलन्। एषु शब्दानुशासनेसु विशेषतया शाकटायनम्, कातन्त्रम्, चान्द्रम्, जैनेन्द्रञ्चास्ति। एतेषां स्व-स्वकाले वैशिष्ट्यं वर्तते स्म ते च स्वीयकाले नानाक्षेत्रेषु सुप्रचलिता अभवन्। एषामुपरि बह्व्यः टीका अभुवन्। या व्याकरणशास्त्रदृष्ट्या महत्वमावहन्ते।

संस्कृतस्यान्तिमव्याकरणरचयितृषु आचार्यहेमचन्द्रस्य स्थानं प्रमुखं वर्तते। अनेन स्वशब्दानुशासनद्वारा संस्कृतभाषायाः विश्लेषणं पूर्णरूपेण विहितम् हैमसम्प्रदायस्य च आधारशीला प्रस्थापिता। गुर्जरस्य उपकर्णावति 'धन्धूका' नामके नगरे विक्रमसंवत् ११४५ कार्तिकपूर्णिमायां मोढवंशोद्भवचाचिंगस्यपत्न्याः 'पाहिणी' अभिधेयायाः कुक्षौ हेमचन्द्रः प्रादूर्बभूव। विस्तारेणास्यपरिचयस्तु स्वविषये प्रथमपरिच्छेदे मयाऽकारि। अत्र दिङ्मात्रेण वर्तते। पाणिनिकृताष्टाध्यायिवत् अनेनापि स्वीयं शब्दानुशासनम् अष्टसु अध्यायेषु विभज्य तदनुसारमेव अध्यायानां पादसंख्या अपि ऊरीकृता।।

किन्त्वस्य तदैव महद्वैशिष्टयं यत् संस्कृतस्य सम्पूर्णानुशासनं सप्ताध्यायेषु परिसमाप्य अष्टमाध्याये प्राकृतव्याकरणस्य प्ररुपणं सर्वाङ्गपूर्णतया विनिर्मितम्। तत्तु अद्यावधिपर्यन्तमपूर्वमद्वितीयञ्चास्ति।

संस्कृतप्राकृतापभ्रंशभाषाणाञ्चास्या व्याकृतेः पञ्चसहस्त्राणि सूत्राणि विरचय्य हेमचन्द्रः श्रान्तो नाऽभूत्। अनेनाष्टादशसहस्त्रश्लोकप्रमाणन्तस्याः बृहद्वृत्तिरपि विरचिता। गणपाठः, धातुपाठः, उणादिलिङ्गानुशासनप्रकरणञ्च निरमायि। तथा च सामान्यपिपठिषुभ्यः परमोपयोगिनी षड्सहस्त्रश्लोकप्रमाणा लघुवृत्तिरपि विनिर्मिता। इतोऽप्यधिकं तेन शब्दानुशासनस्य सूत्रानुक्रमेण सूत्रोदाहरणं प्रयुज्य निजसमकालीन महीपालकुमारपालस्य चरित्रमपि विशालद्व्याश्रयकाव्ये प्ररुपितम्। पुनश्च काव्यानुशासनम्, छन्दोऽनुशासनम्, पुराणम्, दर्शनशास्त्राणि, कोषम्, वनस्पत्यादिबहूनि शास्त्राणि स्वजीवने समपादि। व्याकरणशास्त्रस्य संस्कृतसाहित्यस्य च क्षेत्रे एकव्यक्तिना प्रदत्ता एषा महत्युपलब्धिः परिगण्यते।

प्रत्यक्षादिप्रमाणान्तर्गतशब्दप्रमाणस्य प्राधान्यं मनीषिण आमनन्ति। व्याकृतौ मीमांसादर्शने च एतत् प्रमाणशिरोमणिरुपेणाभ्युपगच्छन्ति। यतो हि उभे प्रमुखतया अस्य आप्तोपदेशरुपशब्दस्य स्वशैल्या विवेचनं कुरुतः। पदार्थः इन्द्रियैः सम्बन्धो भवेदसम्बद्धो वा तस्य बोधः शब्दप्रयोगद्वारा कारयेत्। एतदेव आगमस्य शब्दप्रमाणस्योद्देश्यम्[१]। शब्दनिर्देशे भाषायाः अन्यतमाङ्गरुपेण वाक्यम् आश्रयते, यस्य बोधः (= शाब्दबोधः) शब्दप्रमाणस्य फलं वर्तते[२]। वैयाकरणानां भाषाविश्लेषणानुसारम् आकाङ्क्षा योग्यता तथा सन्निधिद्वारा पदसमूहो वाक्यमुच्यते। एतानि पदानि पदार्थबोधकानि भवन्ति तथा पदानाम् अनया बोधिकाशक्तिद्वारा तानि परस्परम् अन्वितानि भवन्ति। शाब्दबोधे एकपदार्थः अपरपदार्थेन सह संसृष्टो भूत्वा समन्वितबोधं कारयति[३]। दार्शनिकदृष्ट्या केवलम् अखण्डवाक्यमेव व्यवहारोपयोगी तथा सत्यमपि वर्तते[४]। किन्तु शाब्दशास्त्रं भाषाबोधोपयोगरुपेण प्रकल्पितो भूत्वा अखण्डवाक्यस्य विभाजनं पदेषु तथा पदानां वर्णेषु कुरुते। वर्णः पदं तथा वाक्यम् एषां त्रयाणां महत्त्वं कस्मायपि शब्दशास्त्रिणे तावदेव वर्तते यावत् जीवितशरीराय प्राणानाम्।

किन्तु प्रारम्भे शब्दशास्त्रस्य क्षेत्रम् एतावद् व्यापकं नासीत्। वर्णविचारः शिक्षानामकस्य वेदाङ्गस्य विषय आसीत्। पदसाधुत्वस्य विचारः व्याकरणं चक्रे तथा अर्थस्य निरुपणं निरुक्तस्य कार्यम् आसीत्। कालान्तरे एषां त्रयाणां वेदाङ्गानां भारो व्याकरणोपरि आपतितः। वाक्यविचारः प्रधानतया मीमांसायाः विषयः सन्नपि सत्यपि न्यूनाधिकरुपेण अत्र न्यायशास्त्रं व्याकरणञ्च स्वदृष्टिं प्रसारयति। अस्य कारणं वर्तते यत् पदसाधुत्वमात्रेण स्वस्मिन् निरर्थकता भवेत् यदि तस्य परस्परं संसर्गो न भवेत्। अतः व्याकरणस्य अर्थपक्षे चरमसत्तायाः रूपे अखण्डवाक्यस्फोटस्य अभ्युदयो जातः, तदनुसारं वर्णपदवाक्यस्य विश्लेषणक्षेत्रे व्याकृतेः विभिन्नविषयाणां

१. द्रष्टव्य – न्यायवार्तिक, १/१/७

२. 'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी'।। –भाषापरि. का. ८१

३. 'शाब्दबोधे चैकपदार्थेऽपरपदार्थः संसर्गतया भाषते'। – व्यु.वा. पृ.१

४. 'पदेन वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन'।। – वा.प., १/७३

विवेचनं कृतवन्तः। एते च विषया इत्थं वर्गीकृताः भवितुं शक्यन्ते—

१. वर्ण–विचारः —
उच्चारणम्, वर्ण-विकारः (सन्धिः) स्त्रीप्रत्ययः, समासः, कृत्, तद्धितः।

२. पद–विचारः —
सुबन्तमाला, तिङन्तमाला, अव्ययम्, स्त्रीप्रत्ययः, समासः, कृत्, तद्धितः।

३. वाक्य-विचारः —
कारकं तथा विभक्तिः।

अत्र विभक्तेः विचारः पदवाक्ययोरावश्यकः, यतो हि स्वादितिबादिविभक्तिं विना पदत्वं भवितुं न शक्यते (सुप्तिङन्तं पदम्) तथा यदा पदमेव न भविष्यति तर्हि तस्य विचारः कथम् भविष्यति? तेनैव सह पदसाधुत्वानन्तरमेव वाक्ये तस्य स्थाननिरूपणं क्रियते यत् तत्पदं कैः पदैः सह सम्बद्धं वर्तते तथा अस्य सम्बन्धस्य परिणामस्वरूपेण कं बोधं कारयति? उक्तसंकलितबोध एव वाक्यबोधो वर्तते तथा पदानां वाक्यगतसम्बन्धो भवति।

वाक्यरचनायां कारकाणां सर्वाधिकरुपेण प्रदानं वर्तते, यतो हि वाक्यस्य प्राणभूतक्रियासिद्धये प्रयतनं कारकस्यैव कार्यमास्ते। क्रिया कस्मिन्नपि वाक्ये श्रूयमाणा भवेद् वा गम्यमाना – तस्या उपस्थितिरनिवार्या वर्तते। पुनश्च यदा क्रिया निरपेक्षा न तिष्ठति। कस्या अपि शक्तेरपेक्षया तत्तच्छक्तिरुपे वर्तते अतः वाक्यस्य लक्षणं कुर्वाणोऽमरसिंहो ब्रूते—

'सप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता'।

यद्यपि सर्वत्र व्याकरणग्रन्थेषु कारकस्य विवेचनं शब्दपक्षान्तर्गतं कृतं तथापि वस्तुतः एतद् प्रकरणम् अर्थपक्षेण सम्बद्धं वर्तते। शब्दपक्षान्तर्गतम् अस्य निरूपणस्य प्रधानकारणं स्वादिविभक्तिभिस्सह अस्य निकटवर्तिसम्बन्धो वर्तते। अतः अधिकांश-वैयाकरणाः कारकस्य विभक्तेश्च संयुक्तविवरणं ददति।

पूर्वोक्तविवरणेन स्पष्टं भवति यत् कारकप्रकरणविभाजनं सहेतुकं तथा परमावश्यकं वर्तते। इत्यलमतिपल्लवितेन।

छात्रावस्थायामेव संयोगेन चीरकालं जैनमुनीन् हेमव्याकरणमध्यापयितुमवसरो लब्धः। तत्र अनयोराचार्ययोः शब्दानुशासने शोधकार्यस्य विशिष्टाभिरुचिः समुत्पन्ना। व्याकरणशास्त्रे बाल्यकालत एव कारकप्रिय आसम्। संस्कृतभाषायाः वैशिष्ट्याय व्यापकतायै कारकाध्ययनं सहायकृद्वर्तते। इति ज्ञातम् उक्तञ्च–'प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः'।। (वाररुचिसंग्रहः पृ.१) इति अभियुक्तोक्तवचनमपि अस्मिन् समये स्मृतिपटे समागतम्। कारकन्तु भाषाया आंतरिकसंरचना Deep Structure Analysis - याः विषयत्वात् अर्थविज्ञान (Semantics) -स्य शिरोमणिभूतविषयत्वेन फलश्रूतिरूपे अनयोराचार्ययोः शब्दानुशासनस्य प्राणरूपं कारकविषयमेव शोधकार्यं निर्धारितम्। मन्ये यदनयोराचार्ययोः विभक्त्यर्थप्रकरणे अद्यावधिपर्यन्तं प्रायः शोधकार्यं न जातम्।

विषयस्यास्य रूपरेखा पञ्चपरिच्छेदेषु विभाजिता। यस्य स्वरसोऽत्र प्रस्तूयते।

अथ प्रथमपरिच्छेदः परिचयात्मको वर्तते तत्र उभयाचार्ययोः परिचयो वर्तते, अत्र प्रथमम् अनेकतर्कवितर्कप्रमाणैः पाणिनेः कालनिर्णयः, शिष्यपरम्परा तथा तेषां कृतिव्यक्तित्वपरिचयो वर्तते तथैव आचार्यहेमचन्द्रस्यापि इतिवृत्तं तथा कृतित्वस्य परिचयो वर्तते, अत्र हेमचन्द्रस्य काषाञ्चित् घटनानां अनेकविधकथाप्रमाणैः निर्णयो कृतोऽस्ति, अनेन एषः परिच्छेदः रसप्रदो भवति। द्वितीये परिच्छेदे आलोड्यव्याकरण-विषयस्य कदा कीदृशः इति उद्भवो जातः तथा तस्य विकासक्रमश्च प्रमाणपुरस्सरं वर्णितवान्।

अग्रिमे तृतीये परिच्छेदे आचार्यहेमचन्द्रस्य शब्दानुशासनस्य प्रति-अध्यायस्य प्रतिपादस्य परिचयो गुम्फितः। आ. पाणिनेः व्याकरणस्यापि विषयविधया परिचयोऽस्ति।

'विचित्रा सूत्राणां कृतिः आचार्यस्य आचार्येण वा' उभयाचार्ययोः सूत्रशैली रसप्रदा वर्तते। तत्राऽपि उभयोः समीक्षात्मकम् अध्ययनम् अत्यन्तं रुचिकरमस्ति। यथास्थानं वैशिष्ट्यविवेचनमपि तुरीयपरिच्छेदमलङ्करुते। यथा आचार्यपाणिनिः 'पूर्वत्रासिद्धम्' ८-२-१ सूत्रद्वारा सूत्रासिद्धिं करोति तथैव आचार्यहेमचन्द्रोऽपि 'णषमसत्परे स्यादिविधौ च' २-१-६० द्वारा असत्कार्यं करोति। एवं प्रकारेण प्रत्य-

ध्यायस्य पादेषु यथास्थानं अपरापेक्षया वैशिष्ट्यमन्तरञ्च संशोधितमस्ति। प्रान्ते 'एकशास्त्रेण अपरस्य गतार्थता नवा' इत्यस्य परिचर्चा अपि वर्तते।

पञ्चमपरिच्छेदः अस्यशोधकार्यस्य हृदयमस्ति। अत्र क्रियाकारकात्मको विभाग आद्यो वर्तते। यत्र क्रियास्वरुपं क्रियया कारकाणामन्वयः तथा कारकलक्षणविमर्शः, कारकप्रकरणविभाजनस्यहेतुः, कारकार्थत्वे विभक्त्यर्थत्वे भेदाभेदयोः परिचर्चादिविषयाः विवेचिताः सन्ति। तदनु कर्त्रादिषण्णां कारकाणां विशुद्धशास्त्रीयदृष्ट्या विकासमूलकं विवेचनं विस्तृतम्।

कारकमाश्रित्य शोधप्रबन्धेऽस्मिन् प्रतिपादितविषयाः यत्किञ्चित् निरुपिताः। सीमितपरिधावपि, सर्वेषु क्षेत्रेषु निरीक्षणन्न भवेत्—अपनिरीक्षणम् (Mal-observation) तथा (Non-Observation) दोषाः सहजसम्भाव्याः। भाषाविज्ञानस्य सिद्धान्तानुसारं यदा एकामेव भाषां विवदतां वैद्यवाक्कीलानामभिव्यक्तिषु पर्याप्तमन्तरं भवति। तदा प्रस्तुतस्थले विषयनिष्ठः न्यूनतमभाषाभेदोऽवश्यं हि मर्षणीयो भवति। मम विश्वासो वर्तते यत् विरलपुनरुक्तयः प्रतिपादनस्य अभिनवशैल्याः निवेशेन चित्तोद्वेजिका न भविष्यन्ति। अस्यशोधप्रबन्धस्य रचनायां व्याकरणशास्त्रस्य न्यायदर्शनस्य सम्बद्धग्रन्थकाराः, टीककाराः तथा तेषां कृतीनां सूक्ष्मानुशीलनस्य प्रधानं योगदानं वर्तते। शास्त्रानुशीलनं न केवलमदृष्टफलं प्रददाति, अपि तु दृष्टफलं दातुमपि अस्य महार्हभूमिका वर्तते।

विषयस्यास्य पूर्णतायाः पूर्वम् उपकारिजनानां स्मरणं परमावश्यकम्। तत्र प्रथमं काशीस्थानां पू. श्रीराम पाण्डेमहोदयानां सहयोगो वर्तते यैः अस्मिन् शोधकार्ये प्रथमो दिशानिर्देशः कृतः। मम बालसख्योः पण्डितवर्ययोः भरतमूलशंकरयोरपि विशेषरूपेण कार्तज्ञ्यं बिभर्मि। याभ्यां सर्वदा परामर्शस्थले समयं निष्कास्य सहायता प्रदत्ता काशीस्थः अखिलेश द्विवेदी कुञ्जबिहारीजी तथा विष्णुप्रसाद रावल इत्येते सर्वे स्मरणार्हाः एतैरपि सन्दिग्धस्थलेषु परामर्शादिना साहाय्यं प्रदत्तम्। प्रियशिष्यौ अमितकेतनौ अपि प्रसङ्गेऽस्मिन् आशीर्वादभागिनौ स्तः एताभ्यां पुस्तकालयग्रन्थानां प्राप्ति-प्रेषणव्यवस्था सुचारुतया सम्पादिता। वटोदरस्थानां जतीन महोदयानामपि

कृतज्ञताम् आवहे। एतैः प्रारम्भतः विश्वविद्यालयसम्बन्धिकार्याणां विषये प्रत्यक्ष-परोक्षरूपेण सहायता प्रदत्ता। पित्रोश्च आशीर्वादाः वर्तन्ते। मम अग्रजानां मेहुल-भ्रातृणामपि परमोपकारः वर्तते। नैकवारं शोधकार्ये उत्साहवर्धनाय प्रेरणा प्रपूरिता तथैव 'भार्या भारविमोचनाय' मम धर्मपत्नीप्रतिभादेव्या अपि सहायता वरीवर्तते यया गृहभारतः विमुक्तिः प्रदत्ता। बालसखा योगेशोऽपि विशेषधन्यवादार्हः अनेन प्रबन्धोऽयं विना मूल्यं संङ्गणकमध्ये उट्टङ्कितः।

एतेषाम् उपरिस्थानां यथायोगं कृतज्ञतां ज्ञापितवान् किन्तु प.पू.डा.रामपाल शुक्लानां गुरुवर्याणां न शब्दैः नवा अन्यप्रकारैः कृतज्ञतां दर्शयितुं शक्नोमि। सदैव छात्राणां हितेच्छवः पिपठिषूणां सहायकृतः वर्तन्ते। सर्वदा छात्राणाम् अनुकूलतायां स्वानुकूल्यं कुर्वन्ति। पदे-पदे च एतैः दिशानिर्देशः कृतः एतेषां दीर्घायुषे प्रार्थनां कुर्वे। येन संस्कृतस्य संस्कृतेश्च प्रचार-प्रसारस्य संवर्धनं भवेत्।

अन्ते च शरीरिधर्मत्वात् प्रबन्धेऽस्मिन् याश्च काश्चन त्रुटयो भवेयुः 'प्रांशुलभ्ये फले मोहात् उद्बाहुरिव वामनः' तद्वच्च क्षन्तव्याः सूचनीयाश्च।

**गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।**
**हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।।**

*विद्वच्चरण चञ्चरिकः*
યોગેશ ત્રિવેદી.
*(योगेशः त्रिवेदी)*